
मम पुस्तकम्

नाम – _____

पत्रसङ्केतः – _____

_____

चल-दूरवाणी-सङ्ख्या – _____



वार्तालापाय

१. अस्मिन् चित्रे किं किं दृश्यमानम् अस्ति ?
२. चित्रे के के किं किं कुर्वन्ति?
३. यथा चित्रे दृश्यते तथैव अस्माकं समीपे किम्-किम् अस्ति?
४. चित्रे कति आपणाः सन्ति ?


रीता
सौन्दर्यम्
डोसा
अन्ना डोसा
आदिमः
दयाल-
संगीतवृन्दः
दयाल-
संगीतवृन्दः
दयाल

३ अस्माकं जीवनशैली

वयं ज्ञास्यामः

ओ	औ	झ	द	ल	ग	क	य

- २१ तः ५० पर्यन्तं संख्यानां परिचयम्।
- पठनं लेखनं च।
- गुणनादीनां ज्ञानम्
- ५० पर्यन्तं संख्यानां योगः(सङ्कलनम्) व्यवकलनं च।


■ पश्यन्तु, पठन्तु चर्चां च कुर्वन्तु -



वरयात्रिकाः



दोला



वाद्ययन्त्रम्



निर्झरः



गायिका




ताम्बूलम्



क्रीडनकम्



माला



औषधम्

शिक्षक-निर्देशः —

- सहभागिनः क्रमशः प्रत्येकं चित्राणां विषये बोधयन्तु।
- चित्राणाम् अधः तत्सम्बद्धाः शब्दाः प्रदत्ताः सन्ति, तेषाम् आधारेण छात्राः शब्दानाम् अनुमानेन पठेयुः।
- चित्राणाम् अधः लिखितानां शब्दानाम् उपरि अङ्गुलीं संस्थाप्य सहभागिनः पठनाय प्रेरणीयाः।

■ बोधयन्तु चिह्नं कुर्वन्तु च -

भवन्तः/भवत्यः प्रायः मेलापकं गच्छन्ति एव, अधः प्रदत्तेषु चित्रेषु भवान्/भवती मेलापके किं किं दृष्टवान्/दृष्टवती ? समुचितं (✓) चिह्नं योजयतु—





चाय-आपणः	मृत्पात्र-आपणः





कङ्कण-आपणः	कुण्डलिका






बस-यानम्

लक्ष्यसाधनम्





इक्षुरसः

उष्ट्र-शकटम्

■ पठामः लिखामः च -

ओ



ओष्ठः



ओष्ठः ओदनम्

ओ

औ



उलूकानां समूहः




औलूकम् औषधम्


औ

शिक्षक-निर्देशः ——

- सहभागिभ्यः एकैकस्य चित्रस्य परिचयं कारयेयुः ।
- छात्राः चित्रस्य अधः लिखितानां शब्दानाम् उपरि अङ्गुलीं संस्थाप्य पठेयुः, तेभ्यः अक्षराणां लेखनं च कारयेयुः ।

झ





झरः

झषः

झ

झा





झञ्झावातः

झालिः

झा

शिक्षक-निर्देशः –


- स्वयमेव चित्रं दृष्ट्वा सहभागिनः स्वयम् एव पठितुं सिद्धाः भवेयुः इत्यर्थं तेषां सहयोगः करणीयः । ते तानि च अक्षराणि च लिखेयुः ।

झि



झिल्लि-वाद्यानि

झी



झीरुका

शिक्षक-निर्देशः —

- चित्रं दृष्ट्वा पठनाय सहभागिनां सहयोगः करणीयः । ते तानि अक्षराणि लिखेयुः । तान् अक्षराणि च लेखयेयुः ।
- चित्रेण सह सम्बद्धानां विषयाणाम् अपि ते चिन्तनं कथनं च कुर्युः ।

द



दन्ताः



दण्डः

दा




दाढिका



दाडिमम्

दि





दिनकरः

दिशा-सूचकम्

दी






दीपः

दीपावली

दौ



दौहित्रः




दौवारिकः

य



यज्ञः




यमराजः

ल



लक्ष्मीः



लशनुम्

ल

ला



लाङ्गुलम्



लावणिकम्

ला

लि

देवनागरी-लिपिः


अ आ इ ई उ ऊ ऋ ऌ
ए ऐ ओ औ अं अः
क ख ग घ ङ
च छ ज झ ञ
ट ठ ड ढ ण य व ल र
त थ द ध न श ष स ह
प फ ब भ म क्ष त्र ज्ञ श्र




लिपिः

लिपिकः

ली






लीलाधरः

लीची-फलम्

लो



लोचनम्



लोकेशः

लौ




लौहः




लौहभाण्डः

ग



गर्दभः



गजः

ग

गा



गायकः



गात्रम्

गा

गि



गिरिः



गिरीशः

गी



गीता



गीतम्

गो






गोधूमः

गोमयम्

गो

गौ






गौः

गौरी-पुत्रः

गौ

क






कच्छपः

कङ्कतम्

क

का





काकः

कारयानम्

का

कि



किशोरः




किरातः

की




कीटः



कीलः


■ मिलित्वा पठन्तु –


दीपावल्याः दीपकाः



दीपावल्याः रात्रिः आगच्छेत्। जनाः अन्योन्यस्य गृहं लघु-दीपान् स्वीकृत्य गच्छेयुः । दीपान् संस्थाप्य वदेयुः -

"अतिथयः समागताः सन्ति, अवधानेन रक्षन्तु एते शैत्येन पीडिताः न भवेयुः" इति । अहं पूर्वं कदापि एतादृशं मधुरं वाक्यं न श्रुतवान् । स्वगृहात् दीपान् स्वीकृत्य स्वप्रतिवेशिनां गृहेषु स्थापनम् । अद्य एतस्य वाक्यस्य भावं ज्ञात्वा एतस्य माधुर्यम् इतोऽपि वर्धते यत् अस्माकं पारस्परिके सम्बन्धे प्रकाशः स्थिरःभवेत् एवञ्च तस्य ऊष्मा शीतला न भवेत् इति।





अस्मिन् विशाले नगरे इच्छा भवति यत् प्रतिवेशिनां गृहात् बहिः दीपान् संस्थाप्य आगच्छेयम्, एवञ्च तदेव वदेयम् यत् अहं

शिक्षक-निर्देशः — दीपावल्याः दीपाः इति पाठं पठित्वा सहभागिनः श्रावणीयाः पठनार्थं च प्रेरणीयाः ।

बाल्यकाले श्रुतवान् आसम् - **"अतिथयः समागताः सन्ति, अवधानेन रक्षन्तु एते शैत्येन पीडिताः न भवेयुः"** इति... ।

— सुशील शुक्लः

■ पठन्तु कथयन्तु च –

प्रश्नः १. संसारस्य सर्वाधिकं मधुरं वाक्यं किम् अस्ति किमर्थं च ?

प्रश्नः २. भवतः/भवत्याः अनुसारेण संसारस्य सर्वाधिकं मधुरं वाक्यं किमस्ति किमर्थं च ?

प्रश्नः ३. किं भवतः क्षेत्रे अपि दीपावलीम् आधारीकृत्य काचित् प्रसिद्धा परम्परा अस्ति ? तस्याः परम्परायाः विषये कथयतु ।

प्रश्नः ४. स्वस्य क्षेत्रे आचर्यमाणानां रुचिकराणाम् उत्सवानां विषये कथयतु ।

■ मम शब्दाः

शिक्षक-निर्देशः — अस्माकं जीवनशैली इति विषयम् अधिकृत्य चर्चा करणीया । सहभागिनः पृष्ट्वा तेषाम् उत्सवानां सन्दर्भे सम्बद्धान् ३-४ शब्दाः लेखनीयाः । एते शब्दाः तेषां स्वभाषायाः अपि भवितुं शक्नुवन्ति, यथा – दिवाली, होरी, फाग, छठ.....

■ शब्दान् अन्विष्य लिखामः –

अद्य कमलः विविधप्रकारकं भोजनं निर्मितवान्। भोज्यवस्तूनां नामसु गोलाकारं कुर्वन्तु –



किलाटः	पलाण्डुः	तिन्त्रिणी	रक्ताङ्गम्	कंसः	तन्तुचक्रम्	अलावुः
स्थाली	चषकः	अवलेहः	आलुकम्	सूपः	ओदनम्	तुषारः
रोटिका	क्रीडनकम्	चित्रपतङ्गः	कटः	तक्रम्	लवणम्	जलम्
कलशः	वेल्लनी	तप्तकम्	पुष्पाधानी	पेषणी	पायसम्	

■ अधुना भोज्यवस्तूनां नव नामानि लिखन्तु –

१. _____ ४. _____ ७. _____

२. _____ ५. _____ ८. _____

३. _____ ६. _____ ९. _____

■ शब्दान् ध्यानेन पश्यामः, पठामः लिखामः च –

यत्र **'ओ'** इति ध्वनिः अस्ति –

तण्डुलः सूपः ओदनम् शाकम्

यत्र **औ** इति ध्वनिः अस्ति –

औषधम् आकाशवाणी चलदूरभाषः ध्वनियन्त्रम्

यत्र **'दो'** इति ध्वनिः अस्ति –

क्रीडनकम् दोला लोकयानम् द्विचक्रिका

यत्र **'ल'** इति ध्वनिः अस्ति –

श्वेतम् रक्तम् हरीतम् नीलम्

यत्र **'ला'** इति ध्वनिः अस्ति –

अलावुः आलुकम् कारवेल्लम् गृञ्जनकम्

यत्र **'ली'** इति ध्वनिः अस्ति –

चषकः कंसः चमसः स्थाली

यत्र **'लो'** इति ध्वनिः अस्ति –

गोपालः लोकयानम् यन्त्रम् विमानम्

यत्र **'का'** इति ध्वनिः अस्ति –

मयूरः काकः कोकिलः कपोतः

यत्र **'की'** इति ध्वनिः अस्ति –

पक्षी पशुः कीटः खगः

यत्र **'को'** इति ध्वनिः अस्ति –

मर्कटः सिंहः हरिणः कोकिलः

शिक्षक-निर्देशः— शब्दानां पठने सहभागिनां सहयोगं कुर्वन्तु। पृथक्-पृथक् ध्वनियुक्तानां शब्दानां लेखनाय प्रेरयन्तु। एषः ध्वनिः शब्दस्य आदौ मध्ये अन्ते च कुत्रापि भवितुम् अर्हति।

■ आयान्तु, कृत्वा पश्यामः –

दीपावल्यां रमेशः एक-एक-रूप्यकस्य बहूनि नाणकानि प्राप्तवान्। सः नाणकाणां परिवर्तनं धनपत्रकेषु कर्तुम् एकरूप्यकस्य १० नाणकानि आपणिकाय दत्तवान् आपणिकः परिवर्त्य तस्मै दशरूप्यकस्य एकं धनपत्रकं दत्तवान्।






यदि रमेशः आपणिकाय एकैकरूप्यकस्य २० नाणकानि ददाति तर्हि सः तस्य परिवर्तनं कृत्वा १० रूप्यकस्य कति धनपत्रकाणि प्राप्स्यति ? धनपत्रकेषु गोलाकारं करोतु –







■ आयान्तु योजयित्वा गणनां पठामः –


मिष्टान्नस्य एकस्मिन् पात्रे १० लड्डुकानि सन्ति। पश्यामः, जानीमः लिखामः च –


२० + १ =  = २१


२० + २ =  = २२


२० + ३ =  = २३


२० + ४ =  = २४


२० + ५ =  = २५

२० + ६ =  = २६

२० + ७ =  = २७

२० + ८ =  = २८

२० + ९ =  = २९


२० + १० =  = ३०

शिक्षक-निर्देश:— अनेन प्रकारेण अग्रे संख्यानां लेखने सहभागिनां सहयोगं कुर्वन्तु।


३०	+	१	=	३१
३०	+	२	=	३२
३०	+	३	=	३३
३०	+	४	=	३४
३०	+	५	=	३५
३०	+	६	=	३६
३०	+	७	=	३७
३०	+	८	=	३८
३०	+	९	=	३९
३०	+	१०	=	४०

४०	+	१	=	४१
४०	+	२	=	४२
४०	+	३	=	४३
४०	+	४	=	४४
४०	+	५	=	४५
४०	+	६	=	४६
४०	+	७	=	४७
४०	+	८	=	४८
४०	+	९	=	४९
४०	+	१०	=	५०

■ आयान्तु योजयित्वा गणनां पठामः



=



=

■ अधः प्रदत्त-दशरूप्यकैः सह एकरूप्यकस्य नाणकानां योजनेन कति रूप्यकाणि भवन्ति इति चिन्तयन्तु, अवगच्छन्तु उत्तरं च लिखन्तु -

	१० रूप्यकाणां धनपत्रकाणि		१ रूप्यकस्य नाणकानि		सम्पूर्णयोगः
(क)		+		=	३४
(ख)		+		=	
(ग)		+		=	
(घ)		+		=	२२
(ङ)				=	३२
(च)				=	४०
(छ)				=	४२

शिक्षक-निर्देशः — सहभागिनः कथनीयाः यत् दश-दश-समूहस्य गणनापेक्षया गणनापेक्षया दीर्घ-सङ्ख्यायाः गणना सरला भवति। एतत् अपि बोधनीयम् यत् १० एककैः एव दशकं सम्भवति इति।

■ **गणेशस्य समीपे ५० रूप्यकाणि सन्ति, येषु १० रूप्यकाणां ४ धनपत्रकाणि सन्ति एवञ्च १ रूप्यकस्य १० नाणकानि सन्ति।**





(क) गणेशः स्वस्य भगिन्याः कृते १५ रूप्यकाणां कङ्कणानि स्वीकृतवान्। सः आपणिकाय कति धनपत्रकाणि कति नाणकानि च दत्तवान्?

१० रूप्यकाणां धनपत्रकाणि -

१ रूप्यकस्य नाणकानि -

= दशकम् एककम्

(ख) गणेशः २२ रूप्यकाणां कुण्डलिकाम् अपि खादितवान्। गणेशः आपणिकाय कति धनपत्रकाणि नाणकानि च दत्तवान् स्यात्?

१० रूप्यकाणां धनपत्रकाणि -

१ रूप्यकस्य नाणकानि -

= दशकम् एककम्

(ग) गणेशस्य समीपे अधुना कति धनपत्रकाणि नाणकानि च अवशिष्टानि सन्ति?

१० रूप्यकाणां धनपत्रकाणि -

१ रूप्यकस्य नाणकानि -

= दशकम् एककम्

शिक्षक निर्देशः — रूप्यकाणि, मिष्टान्नस्य पुटकं, पुष्पाणां मालाः इत्येतैः विषयैः सहभागिनां कृते एककानां दशकानां च ज्ञानं प्रदातुं प्रयत्नः कृतः अस्ति। सहभागिनां स्वस्य अनुभवस्य आधारेण एतस्य ज्ञानाय अवसराः देयाः। एवमेव अन्याः सङ्ख्याः अपि स्वीकृत्य सहभागिनः प्रेरणीयाः, यत् सहभागिनः अन्यासु सङ्ख्यासु अपि एकं दशकं च ज्ञातुं शक्नुयुः।

■ **भवतः/भवत्याः समीपे १० रूप्यकाणि एवञ्च १ रूप्यकस्य कानिचन नाणकानि सन्ति। अधुना कथयन्तु यत् भवान् आपणिकाय वस्तूनां मूल्यं कथं दास्यति ?**

मूल्यम्	वस्तूनि	दशरूप्यकाणां धनपत्रकाणि/ नाणकानि	एकरूप्यकस्य धनपत्रकाणि/ नाणकानि
₹५०	आलुकम्		
₹४२	कुण्डलिका		
₹२९	चषकः		
₹१५	कदलीफलम्		

■ **पङ्कजस्य समीपे १०-१० पुष्पाणां मालाद्वयम् अस्ति एवञ्च ४ पुष्पाणि सन्ति। तस्य समीपे आहत्य कति पुष्पाणि सन्ति ? प्रदत्ते पुटके समीचीनां सङ्ख्यां लिखामः, योजयित्वा वदामः च।**





दशकम् एककम्

\+

=


सम्पूर्णयोगः

शिक्षक-निर्देशः — ₹५० रूप्यकेषु '₹' इति एतत् चिह्नं रूप्यकस्य प्रतीकचिह्नम् अस्ति।

■ मिलित्वा पठामः –

कथा

१



अस्माकं शिक्षकः कथयति यत्, वत्स ! सम्यक् पठतु सम्यक् परिश्रमं च करोतु इति। सर्वेषां परिश्रमेण एव देशस्य विकासः भवति।

आम् वत्स! यथा – अस्माकं कृषकाः, सैनिकाः, श्रमिकाः, क्रीडकाः इत्येते सर्वे अपि परिश्रमं कुर्वन्ति, देशस्य ख्यातिं च प्रसारयन्ति। "हे पितः! अहम् अपि सम्यक् परिश्रमं कृत्वा देशस्य ख्यातिं प्रसारयिष्यामि।"

■ चर्चायाः कृते -

१. भवतः/भवत्याः परिवारस्य सदस्याः किं कार्यं कुर्वन्ति ? तेषां कार्याणां सम्पादने कीदृश्यः समस्याः आयान्ति ?

२. भवतः/भवत्याः अनुसारेण सर्वाधिकं परिश्रमं के कुर्वन्ति ?

शिक्षक-निर्देशः — सहभागिभिः सह श्रमः, श्रमिकत्वं, लिङ्गम् इत्येतैः सह सम्बद्धेषु विषयेषु चर्चां कुर्वन्तु। सहभागिनः बोधनीयाः यत् स्त्रीपुरुषौ पतिपत्न्यौ वा परस्परं पूरकौ सहयोगिनौ च स्तः। परिश्रमस्य विषये अपि तैः सह चर्चां कुर्वन्तु।

३. शारीरिक-परिश्रमस्य कार्याणां विषये प्रायः जनाः किं विचारयन्ति ? किं भवान्/भवती तेषां विचारैः सहमतः अस्ति ? किमर्थम् ?

२

"हे पितः! गृहस्य कार्येषु भवान् मातुः सहयोगं करोति इति एतत् दृष्ट्वा अहं बहु प्रसन्नः भवामि।"

"आम् पुत्र! परस्परं सहयोगेन एव परिवारः प्रचलति। पतिपत्न्यौ मित्रे अपि स्तः सहयोगिनौ अपि।"

सत्यं पितः ! अहम् अपि गृहस्य कार्येषु भवतां सहयोगं करिष्यामि।



– आयुष्मान् गोस्वामी

■ चर्चायाः कृते -

१. किं भवतः/भवत्याः गृहे स्त्रीणां पुरुषाणां च कार्यं विभक्तम् अस्ति ?

२. यदि स्त्रीपुरुषौ द्वौ अपि गृहात् बहिः कार्यं कर्तुं गच्छतः तर्हि गृहं प्राप्य कः किं दायित्वं स्वीकुर्यात् ? किमर्थञ्च ?

३. स्त्रीणां पुरुषाणां च मध्ये कार्यस्य विभाजनं समाजस्य कृते कथं हानिकारकम् अस्ति ?

४. द्वयोः अपि कथयोः बालानाम् उत्तरं समाजस्य परिवर्तनाय कथं सहयोगं करिष्यति ?

■ मम शब्दाः